# Rishidadhichiproktam Shiva Kavacham

# ઋષિદધીચિપ્રોક્તં શિવકવચમ્

## Document Information

Text title : Rishidadhichiproktam Shiva Kavacham

File name : RRiShidadhIchiproktaMshivakavacham.itx

Category : shiva, shivarahasya, kavacha

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 27 madhyArjunamahimAnuvarNanam | 137-163||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# ઋષિદધીચિપ્રોક્તં શિવકવચમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
દધીચિરુવાચ
કવચં દેવદેવસ્ય વક્ષ્યેશ઼ૃણુ નરાધિપ ।
યેનાઽઽવૃતો મહાદુઃખૈર્મુક્તો મુક્તિ ચ વિન્દતિ ॥ ૧૩૭॥

- -

ધ્યેયઃ શ્રીમન્મહાદેવઃ સામ્બઃ સંસારમોચકઃ ।
પવિત્રહૃદયૈઃ શુદ્ધૈર્ભસ્મરુદ્રાક્ષભૂષણૈઃ ॥ ૧૩૮॥

શ્રીવિશ્વેશ્વર મુમાસહાયમનઘં વિશ્વાત્મકં ચિદ્ઘનમ્ ।
સત્યં જ્ઞાનમનન્તમક્ષરમજં નિર્લિપ્તમેકં પ્રભુમ્ ॥ ૧૩૯॥

ઓઙ્કારાત્મકમક્ષરં પરતરં બ્રહ્માદિભિર્ભાવિતમ્ ।
સાનન્દં હૃદિ ભાવયેદ્ભવભયધ્વાન્તાન્તમાનન્દદમ્ ॥ ૧૪૦॥

એવં ધ્યાત્વા મહાદેવં સચ્ચિદાનન્દલક્ષણમ્ ।
કવચેનાવૃતો ભૂત્વા મૃત્યુપાશૈર્વિમુચ્યતે ॥ ૧૪૧॥

- -

યદ્બ્રહ્મરન્ધ્રં મમ સંવિદાભં
તદ્બ્રહ્મરન્ધ્રં ભગવાનુમેશઃ ।
પાયાત્સ સંસ્થાનમનન્તલક્ષણં
નિવાર્ય સર્વાઘકુલં નિરન્તરમ્ ॥ ૧૪૨॥

તત્પાર્શ્વર્ધાગ્નિગમાન્ત ચારી
રુદ્રઃ શિખાયાં તુ શિવાવતંસઃ ।
શિરઃ શિખાં પાતુ મમેન્દુચૂડઃ
ભાલં મમાવ્યાજ્જ્વલનોરુભાલઃ ॥ ૧૪૩॥

વામં કપોલં મમ પાતુ શમ્ભુઃ

કપોલમીશોઽવતુ દક્ષિણં મે ।
પાયાદ્ગિરીશો મમ વામનેત્રં
ત્રિલોચનો દક્ષિણમક્ષિ પાયાત્ ॥ ૧૪૪॥

ભ્રૂયુગ્મમવ્યાદ્વૃષભધ્વજો મે
ભ્રૂમધ્યમવ્યાન્મખનાશદક્ષઃ ।
નાસાપુટં પાતુ મમાન્તકાન્તકો
નાસાન્તરં પાતુ પિનાકપાણિઃ ॥ ૧૪૫॥

મુખં મમાવ્યાત્સ ચ પઞ્ચવક્ત્રઃ
પાયાન્મમૌષ્ઠૌ ગજકૃત્તિવાસાઃ ।
દન્તાન્મમાવ્યાત્પ્રભુરિન્દ્ર દન્તો
જિહ્વાં મમાવ્યાન્નિગમાન્તજિહ્વઃ ॥ ૧૪૬॥

શ્રીનીલકણ્ઠોઽવતુ કણ્ઠદેશં
પાયાન્મહેશોઽવતુ કણ્ઠપાર્શ્વમ્ ।
સ્કન્ધૌ મમાવ્યાન્મદનાન્તકારી
વક્ષઃ સ્થલં પાતુ મમામ્બિકેશઃ ॥ ૧૪૭॥

વિશ્વમ્ભરોઽવ્યાદુદરં મમેદં
સર્વેશ્વરો રક્ષતુ રોમકૂપાન્ ।
આન્ત્રાણિ પાયાદુરુશક્તિરવ્યા-
દસ્થીનિ વિશ્વસ્થિતિનાશહેતુઃ ॥ ૧૪૮॥

ત્રિય(ત્ર્ય)મ્બકો દક્ષિણબાહુમવ્યા-
દ્વામં મમાવ્યાદ્ભુજગાવનદ્ધઃ ।
પ્રકોષ્ઠમવ્યાદ્ગિરિરાજચાપો
હસ્તૌ મમાવ્યાદ્વરશૂલહસ્તઃ ॥ ૧૪૯॥

વિશાખનાથોઽવતુ હસ્તશાખા-
ન્નખાન્મમાવ્યાન્નરસિહ્મ હારી ।
પૃષ્ઠં મમાવ્યાત્રિપુરારિ રવ્યા-
ત્કટિદ્વયં મે ગિરિજાસહાયઃ ॥ ૧૫૦॥

કટ્યન્તરાલં મમ પાતુ શમ્ભુ-
રૂરુદ્વયં મે મૃગશાબપાણિઃ ।
જાનુદ્વયં પાતુ જનાર્દનેશો

ગુલ્ફદ્વયં પાતુ વિરાટ્સ્વરૂપઃ ॥ ૧૫૧॥

પાદૌ મમાવ્યાદમરૈકવન્દ્યઃ
પાયાદ્ધરઃ પાદતલદ્વયં મે ।
પાદાઙ્ગુલીઃ પાતુ સમસ્તરૂપો
સર્વાં તનું પાતુ મહેશ્વરો મે ॥ ૧૫૨॥

પ્રાચ્યાં સદા રક્ષતુ નીતુરુદ્રો
કર્પૂર ગૌરોઽવતુ દક્ષિણસ્યામ્ ।
પાતુ પ્રતીચ્યાં ભગનેત્રહારી
પાયાદુદીચ્યાં જગદેકનાથઃ ॥ ૧૫૩॥

મમોર્ધ્વમવ્યાદુડુરાજકાન્તિ-
રધો મમાવ્યાદુરગેન્દ્ર ભૂષઃ ।
દિગન્તરાલેષુ સમસ્તનાથઃ
પાયાદ્વૃષીધીશ્વરકેતુલક્ષ્યઃ ॥ ૧૫૪॥

નદીષુ માં રક્ષતુ વિશ્વનાથઃ
કૂપેષુ માં રક્ષતુ વિશ્વમૂર્તિઃ ।
પાયાત્સમુદ્રેષુ જલાધિરાજઃ
સરિત્સમુદ્રાદિવિધાનદક્ષઃ ॥ ૧૫૫॥

વાપીષુ પાયાદતિબાહ્યવર્તી
દવાનલાત્પાતુ દરીશહારઃ ।
ગર્તેષુ પાયાત્સુરગર્વહારી
વૃક્ષેષુ પાયાદ્વૃષભધ્વજોમામ્ ॥ ૧૫૬॥

પાયાદ્ગજેભ્યો ગજદર્પહારી
પાયાદહિભ્યોઽપિ હિ વીરભદ્રઃ ।
પાયાત્સમેભ્યો વિષસર્પહારી
પાયાત્ત્રિમૂર્તિવિષવૃશ્ચિકેભ્યઃ ॥ ૧૫૭॥

ભૂતાધિપઃ પાતુ વિરોધિભીતેઃ
રક્ષઃ પિશાચિદિભયાત્કપાલી ।
મૃત્યુઞ્જયો રક્ષતુ મૃત્યુભીતેઃ
કાલાગ્નિરુદ્રોઽવતુ કાલભીતેઃ ॥ ૧૫૮॥

પાપારિરવ્યાદ્બહુપાતકેભ્યઃ
પાયાદ્ગ્રહેભ્યઃ કમલાસનાર્ચ્યઃ ।
શ્રી વિષ્ણુનેત્રાર્ચિત પાદપદ્મઃ
પાતુ પ્રભાતેષ્વખિલેષુ શમ્ભુઃ ॥ ૧૫૯॥

મધ્યન્દિનેષ્વેવ મૃડોઽનિશં માં
સાયાહ્નકાલેઽપ્યમરાધિનાથઃ ।
મહેશ્વરો રક્ષતુ મધ્યરાત્રે
પાયાદુષસ્યાન્ધકનાશહેતુઃ ॥ ૧૬૦॥

સર્ષેષુકાલેષ્વપિ પાતુ શમ્ભુ-
રુમાઙ્ગસંશ્લિષ્ટમનોજ્ઞદેહઃ ।
માર્ગે મૃગવ્યાધવપુર્ધરોઽવ્યાદ્
યુદ્ધેષુ પાયાદસુરૌઘદારી ॥ ૧૬૧॥

સર્વત્ર સર્વાર્તિહરો હરોવ્યા-
ત્સર્વેપ્સિતાર્થપ્રદરૂપધરી(ધારી) ।
રક્ષાવિહિનસ્થલમસ્તિ યન્મે
તત્રાવતુ શ્રીવરવીરભદ્રઃ ॥ ૧૬૨॥

- -
કૃત્વૈવં કવચં પૂર્વં સ્તોત્રમેતત્પઠેન્નરઃ ।
સ્તોત્રં ચૈતન્મહેશેન તસ્મા આખ્યાતમાદરાત્ ॥ ૧૬૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિદધીચિપ્રોક્તં શિવકવચં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૭ મધ્યાર્જુનમહિમાનુવર્ણનમ્ । ૧૩૭-૧૬૩॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 27 madhyArjunamahimAnuvarNan
. 137-163..

Notes:
Ṛṣi Dadhīci ઋષિ દધીચિ conveys the ŚivaKavacam શિવકવચમ્ (to the King) and mentions about the related ŚivaStotram શિવસ્તોત્રમ્.
The latter can be accessed from one of the links given below.

Proofread by Ruma Dewan

*Rishidadhichiproktam Shiva Kavacham*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*